श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवात्स्यवरदगुरुभिरनुगृहीतं

# ॥ श्री परत्वादिपञ्चकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री परत्वादिपञ्चकम् ॥

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम्।
भाष्यामृतप्रदानाद्यः सञ्जीवयति मामपि॥

## परवासुदेवस्तुतिः

उद्यद् भानुसहस्र भास्वर परव्योमास्पदं निर्मल
ज्ञानानन्द घन स्वरूपममल ज्ञानादिभिष्षड्गुणैः।
जुष्टं सूरिजनाधिपं धृतरथाङ्गाब्जं सुभूषोज्ज्वलं
श्रीभूसेव्यमनन्तभोगिनिलयं श्रीवासुदेवं भजे॥ १ ॥

## व्यूहवासुदेवस्तुतिः

आमोदे भुवने प्रमोद उत संमोदे च सङ्कर्षणं
प्रद्युम्नं च तथानिरुद्धमपि तान् सृष्टि स्थिती चाप्ययम्।
कुर्वाणान् मतिमुख्य षड्गुणवरैः युक्तांस्त्रियुग्मात्मकैः
व्यूहाधिष्ठितवासुदेवमपि तं क्षीराब्धिनाथं भजे॥ २ ॥

## विभवस्तुतिः

वेदान्वेषण मन्दराद्रिभरण क्ष्मोद्धारण स्वाश्रित
प्रह्लादावन भूमिभिक्षण जगद्विक्रान्तयो यत्क्रियाः।
दुष्टक्षत्रनिबर्हणं दशमुखाद्युन्मूलनं कर्षणं
कालिन्द्या अतिपाप कंसनिधनं यत्क्रीडितं तन्नुमः॥ ३ ॥

www.prapatti.com

## अन्तर्यामि स्तुतिः

यो देवादिचतुर्विधेष्ट जनिषु ब्रह्माण्डकोशान्तरे
संभक्तेषु चराचरेषु निवसन्नास्ते सदान्तर्बहिः।
विष्णुं तं निखिलेष्वणुष्वणुतरं भूयस्सु भूयस्तरं
स्वाङ्गुष्ठप्रमितं च योगिहृदयेष्वासीनमीशं भजे॥ ४॥

## अर्चा स्तुतिः

श्रीरङ्गस्थल वेङ्कटाद्रि करिगिर्यादौ शतेऽष्टोत्तरे
स्थाने ग्रामनिकेतनेषु च सदा सान्निध्यमासेदुषे।
अर्चारूपिणमर्चकाभिमतितः स्वीकुर्वते विग्रहं
पूजां चाखिलवाञ्छितान् वितरते श्रीशाय तस्मै नमः॥ ५॥

## फलश्रुतिः

प्रातर्विष्णोः परत्वादिपञ्चकस्तुतिमुत्तमाम्।
पठन् प्राप्नोति भगवद्भक्तिं वरद निर्मिताम्॥ ६॥

॥ इति श्री परत्वादिपञ्चकम् समाप्तम्॥

www.prapatti.com